संस्कृतवार्ताः

17.10.2024

सायं - 06:20

<u>मुख्यवार्ताः</u>

· प्रधानमन्त्री नरेन्द्रमोदी सबलं प्रतिपादितवान् यत् भगवत: बुद्धस्य शिक्षा: न केवलं प्रासङ्गिका: अपि तु अद्यतने विश्वे अत्यावश्यकरूपेण स्थिता: सन्तीति।

· भारतीय-जनतापार्टीतिदलस्य वरिष्ठो नेता नायबसिंह: अद्य द्वितीयवारं हरियाणाया: मुख्यमन्त्रिपदाय शपथवचनं स्वीकृतवान्।

· त्रयाणाम् अफ्रिकीय-देशानां यात्रायाः तृतीये अन्तिमे च चरणे राष्ट्रपतिः द्रौपदी-मुर्मु: अद्य मलावी-देशं प्राप्नोत्। तत्र एषा देशस्य शीर्षनेतृभिस्साकं भारतीयसमुदायेन च सह संवादं कृतवती।

· रेलयानेषु अग्रिम-आरक्षणस्य विद्यमानसमयावधिं विंशत्यधिक-एक-शतं दिवसात् षष्टी: दिवसान् यावत् न्यूनीकर्तुं रेलमन्त्रालयेन निर्णयः कृतः।

· भारत-ऋतुविज्ञान-विभागेन सम्भावना प्रकटिता यत् केरल-कर्णाटक-माहे-लक्षद्वीपेषु आगामिनं पञ्चदिनं यावत् अतिवृष्टि: भविष्यति।

· आई.एस्.एस्.एफ्. लक्ष्यभेदक-प्रतिस्पर्धाया: विश्वचषक-द्वन्द्वस्य अन्तिमचक्रे भारतस्य अनन्तजीतसिंह: पुरुषाणां स्कीट-प्रतिस्पर्धायां कांस्य-पदकं समर्जितवान्।

<u>प्रधानमन्त्री-अभिधम्म दिवस:</u>

प्रधानमन्त्री नरेन्द्रमोदी सबलं प्रतिपादितवान् यत् भगवत: बुद्धस्य शिक्षा: न केवलं प्रासङ्गिका: अपितु अद्यतने विश्वे अत्यावश्यकरूपेण स्थिता: सन्तीति। श्रीमोदी अग्रे कथितवान् यत् भारतेन विश्वाय युद्ध: नैव अपितु बुद्ध: प्रदत्त। अनेन समुदीरितं यत् समग्रविश्वं भगवति बुद्धे समाधानं मेलिष्यति न तु युद्धे। प्रधानमन्त्री अद्य नवदिल्ल्याम् अन्ताराष्ट्रिय-अभिधम्म-दिवसावसरे अथ च पालीभाषां शास्त्रीभाषात्वेन मान्यताप्राप्ते समायोजिते समारोहे भगवन्तं बुद्धं आधृत्य इमानि वक्तव्यानि कथितवान्।

प्रधानमन्त्रिणा अत्रावसरे प्रोदीरितं यत् भाषा-साहित्य-कला-आध्यात्मिकता: एव सांस्कृतिक स्तम्भत्वेन कस्मैश्चिदपि देशाय अभिज्ञानं विनिर्मातीतीति। अद्य यदा देश: विकासपथि अग्रे संवर्धमानो विद्यते तावत् तस्य मूलानि आत्मसम्मान-आत्मविश्वास-स्वाभिमानैस्सह गहनतया संलग्नानि सन्तीति। श्रीमोदिना पुन: प्रत्यपादयत् यत् भारतेन परिर्तनकारिणी यात्रा समारब्धा या अमृतकालरूपेण ज्ञायते अपि च या हि सप्तचत्वारिंशदधिकद्विसहस्रतमवर्षं यावत् प्रचलिष्यति। श्रीमोदिना केन्द्रप्रशासनेन पालीभाषाया: शास्त्रीयभाषाया: रूपेण प्रदत्त-मान्यता प्रशंसिता।

## हरियाणा – शपथसमारोह:

भारतीय जनतापार्टीतिदलस्य वरिष्ठो नेता नायबसिंह: अद्य द्वितीयवारं हरियाणाया: मुख्यमन्त्रीपदाय शपथवचनं स्वीकृतवान्। हरियाणाया: राज्यपालेन बण्डारु-दत्तात्रेयेण पञ्चकुलायां तस्मै शपथवचनम् आकारितम्।

एतस्मिन् शपथवचन समारोहे प्रधानमन्त्रिणं नरेन्द्रमोदिनं समेत्य भाजपेतिदलस्य अनेके नेतार: उपस्थिता: आसन्। श्री सैनी इत्यमुं समेत्य त्रयोदश विधायका: राज्यपालस्य दत्तात्रेयस्य उपस्थितौ शपथवचनानि स्वीकृतवन्त: ।

## राष्ट्रपति मलावी यात्रा

त्रयाणां अफ्रिकीय-देशानां यात्रायाः तृतीये अन्तिमे च चरणे राष्ट्रपतिः द्रौपदी-मुर्मु: अद्य मलावी-देशं प्राप्नोत्। भारतस्य राष्ट्रपतेः मलावी-देशस्य एषा प्रथमा यात्रा भविष्यति। आगमनसमये राष्ट्रपतेः अत्यन्तं उत्साहपूर्वकं औपचारिकं स्वागतम् अभवत्। मलावी-देशे राष्ट्रपतये द्वैपाक्षिकी प्रतिनिधि-स्तरीया च सभा आयोजिता तथा च भारतीय-प्रवासिभि: सह संवादं कृतवती।

## रेलमार्ग आरक्षणम् :

रेलयानेषु अग्रिम आरक्षणस्य विद्यमानसमयावधिं विंशत्यधिक एक शतं दिवसात् षष्टी: दिवसान् यावत् न्यूनीकर्तुं सर्वकारेण निर्णयः कृतः। रेलमन्त्रालयेन एकस्मिन् परिपत्रे आगामिमासस्य प्रथमदिनात् आरभ्य नूतनः नियमः प्रवर्तयिष्यते इति उक्तम्। परन्तु अस्मिन् वर्षे अक्टोबर्-मासस्य ३१ दिनाङ्कपर्यन्तं कृतानि सर्वाणि आरक्षणानि अक्षुण्णानि एव भविष्यंति।

मुरुगनः - वक्तव्यम्

केन्द्रीय-सूचनाप्रसारण-राज्यमन्त्री डॉ० एल्. मुरुगनः प्रावोचत् यत् जनानां पार्श्वे उचितसूचनायाः गुणवत्तायुतानां सामग्रीणञ्च प्रसारणं प्रसारकाणां कर्तव्यमस्ति इति। डॉ० मुरुगन इत्ययम् अद्य नवदिल्ल्यां इण्डिया मोबाइलकाङ्गेस इत्यस्मिन् प्रसारणक्षेत्रे उदीयमानेषु साधनेषु आयोजितां एकां सङ्गोष्ठीं सम्बोधितवान्। असौ भविष्याय नवीनप्रौद्योगिकीनां महत्वं प्रसारणञ्च उल्लिखितवान्। श्रीमुरुगनः अकथयत् यत् केन्द्रीयमन्त्रिमण्डलेन साम्प्रतिके समये चतुस्त्रिंशदधिक-द्विशतं नगरेषु त्रिंशदधिक-सप्तशतं नवीनां निज-रेडियोइति वाहिनीं स्थापयितुं स्वीकृतिः प्रदत्ता।

वाल्मीकिजयन्ती

अद्य समग्रदेशस्य विभिन्नेषु भागेषु वाल्मीकिजयन्ती आमान्यते। दिवसोऽयं रामायणकाव्यस्य रचयितुः महर्षिवाल्मीकिनः जन्मजयन्त्यवसरे परिपाल्यते। महर्षिः वाल्मीकिः संस्कृतभाषायाः आदिकवित्वेनापि अभिज्ञायते। अत्रावसरे शोभायात्राः अपि आयोज्यन्ते। उत्तरप्रदेशे अनेकेषु जनपदेषु मण्डलेषु च आदिकवेः सम्माने सांस्कृतिककार्यक्रमाः अपि आयोजिताः। राष्ट्रपतिः उपराष्ट्रपतिः प्रधानमन्त्री च महर्षिणः वाल्मीकेः जयन्त्यवसरे जनेभ्यः शुभकामनाः प्रदत्तवन्तः।

सर्वोच्चन्यायालय-असम

युगान्तकारीणि निर्णये सर्वोच्चन्यायालयेन असम-अकोर्ड इति संधिपत्रस्य संस्तुतौ नागरिकता अधिनियम एक नव पञ्च पञ्च इत्यस्य उपबन्धस्य षड्(अ) इत्यस्य संवैधानिकता स्वीकृता। उपबन्धोऽयम् असम-अकोर्ड इत्यस्यालोके पञ्चाशीति-उत्तर एकोनविंशतिशत-तमे वर्षे आगतोऽस्ति, यो असम-राज्ये केभ्यश्चित् प्रवासिजनेभ्यः नागरिकतायाः प्रतिमानं निर्धारितं करोति इति। भारतस्य मुख्य-न्यायाधीशेन न्यायामूर्तिना डी.वाय. चन्द्रचूड इत्यनेन पञ्च-न्यायाधीशात्मकस्य संवैधानिक-पीठस्य अध्यक्षरूपेण निर्णयोऽयं श्रावितः। न्यायमूर्तिः डी.वाय. चन्द्रचूडः उक्तवान् यत् तेनापि अस्य बहुमत-आधारिते-निर्णस्य भागरूपे चतुर्णां न्यायाधीशानां मतैक्यस्य आलेखनं कृतम् अस्ति अथ न्यायमूर्तिः जे. बी. पारदीवाल इत्येषः स्वस्य एकाकी-वैमतस्य आलेखनं कृतवान्। मुख्यन्यायाधीशः डी. वाय. चन्द्रचूडः उक्तवान् यत् असम अकोर्ड इति संधिपत्रं अवैध-प्रवासनस्य समस्यायाः एकः राजनैतिक-उपचारः आसीत् इति।

नितिन-गडकरी-मेथेनॉल

केन्द्रीय-मार्ग-परिवहन राजमार्ग मंत्री नितिन-गडकरी उक्तवान् यत् सर्वकार: अल्ट्रा-एन्फोर्समेन्ट कांक्रीट इति विनिर्माण-प्रौद्योगिक्या: उपयोगेन सेतु-निर्माणस्य मेट्रो-परियोजनाया: निर्माणस्य च व्यये चतुर्थ-भागस्य अपचितिं प्राप्तुं प्रयासरत: अस्ति। एषा विनिर्माण प्रौद्योगिकी मलेशिया देशत: समनुकूलिता अस्ति। श्री गडकरी नवदिल्ल्यां नीति-आयोगेन आयोजितस्य अन्ताराष्ट्रिय मेथेनॉल सम्मेलनस्य उद्घाटनानन्तरम् प्रवदन्नासीत। केन्द्रीय-मन्त्री उक्तवान् यत् जैव-डीजल वैकल्पिक-ईंधनयो: निर्यात-कार्ये महती संभावना वर्तते।

भारत-ऋतुविज्ञान

भारत-ऋतुविज्ञान-विभागेन सम्भावना प्रकटिता यत् केरल-कर्णाटक-माहे-लक्षद्वीपेषु आगामिनं पञ्चदिनं यावत् अति वृष्टि: भविष्यति। तत्रैव, तमिलनाडु-गोवा-पुद्दुचेरी-तटीयान्ध्रप्रदेशेषु अग्रिमे सप्ताहे अल्पत: मध्यमं यावत् वृष्टि: सम्भावितास्ति।

आई.एस्.एस्.एफ्

आई.एस्.एस्.एफ्. लक्ष्यभेदक-प्रतिस्पर्धाया: विश्वचषक-द्वन्द्वस्य अन्तिमचक्रे भारतस्य अनन्तजीतसिंह: स्कीट-फाइनल-शॉटगन-प्रतिस्पर्धायां कांस्य-पदकं समर्जितवान्।

।।इति वार्ता:।।